Raghuvansha 13 by Kalidas

# રઘુવંશં સર્ગઃ ૧૩ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha sarga 13

File name : raghuvansha13.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : September 09, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# રઘુવંશં સર્ગઃ ૧૩ કાલિદાસકૃતમ્

અથાત્મનઃ શબ્દગુણં ગુણજ્ઞઃ પદં વિમાનેન વિગાહમાનઃ ।
રત્નાકરં વીક્ષ્ય મિથઃ સ જાયાં રામાભિધાનો હરિરિત્યુવાચ ॥ ૧૩-૧॥

વૈદેહિ પશ્યઽઽમલયાદ્વિભક્તં મત્સેતુના ફેનિલમમ્બુરાશિમ્
છાયાપથેનેવ શરત્પ્રસન્નમાકાશમાવિષ્કૃતચારુતારમ્ ॥ ૧૩-૨॥

ગુરોર્યિયક્ષોઃ કપિલેન મેધ્યે રસાતલં સંક્રમિતે તુરંગે ।
તદર્થમુર્વીમવધારયદ્ભિઃ પૂર્વૈઃ કિલાયં પરિવર્ધિતો નઃ ॥ ૧૩-૩॥

ગર્ભં દધત્યર્કમરીચયોઽસ્માદ્વિવૃદ્ધિમત્રાશ્નુવતે વસૂનિ ।
અબિન્ધનં વહ્નિમસૌ બિભર્તિ પ્રહ્લાદનં જ્યોતિરજન્યનેન ॥ ૧૩-૪॥

તાં તામવસ્થાં પ્રતિપદ્યમાનં સ્થિતં દશ વ્યાપ દિશો મહિમ્ના ।
વિષ્ણોરિવાસ્યાનવધારણીયમીદૃક્તયા રૂપમિયત્તાયા વા ॥ ૧૩-૫॥

નાભિપ્રરૂઢામ્બુરુહાસનેન સંસ્તૂયમાનઃ પ્રથમેન ધાત્રા ।
અમું યુગાન્તોચિતયોગનિદ્રઃ સંહૃત્ય લોકાન્પુરુષોઽધિશેતે ॥ ૧૩-૬॥

પક્ષચ્છિદા ગોત્રભિદાત્તગન્ધાઃ શરણ્યમેનં શતશો મહીધ્રાઃ ।
નૃપા ઇવોપપ્લવિનઃ પરેભ્યો ધર્મોત્તરં મધ્યમમાશ્રયન્તે ॥ ૧૩-૭॥

રસાતલાદાદિભવેન પુંસા ભુવઃ પ્રયુક્તોદ્વહનક્રિયાયાઃ ।
અસ્યાચ્છમમ્ભઃ પ્રલયપ્રવૃદ્ધં મુહૂર્તવક્ત્રાભરણં બભૂવ ॥ ૧૩-૮॥

મુખાર્પણેષુ પ્રકૃતિપ્રગલ્ભાઃ સ્વયં તરંગાધરદાનદક્ષઃ ।
અનન્યસામાન્યકલત્રવૃત્તિઃ પિબત્યસૌ પાયયતે ચ સિન્ધુઃ ॥ ૧૩-૯॥

સસત્વમાદાય નદીમુખામ્ભઃ સંમીલયન્તો વિવૃતાનનત્વાત્ ।
અમી તિરોભિસ્તિમયઃ સરન્ધ્રૈરૂર્ધ્વં વિતન્વન્તિ જલપ્રવાહાન્ ॥ ૧૩-૧૦॥

માતંગનક્રૈઃ સહસોત્પતદ્ભિર્ભિન્નાન્દ્વિધા પશ્ય સમુદ્રફેનાન્ ।
કપોલસંસર્પિતયા ય એષાં વ્રજન્તિ કર્ણક્ષણચામરત્વમ્ ॥ ૧૩-૧૧॥

વેલાનિલાય પ્રસૃતા ભુજંગા વહોર્મિવિસ્ફૂર્જથુનિર્વિશેષાઃ ।
સૂર્યાંશુસંપર્કવિવૃદ્ધરાગૈર્વ્યજ્યન્ત એતે મણિભિઃ ફણસ્થૈઃ ॥ ૧૩-૧૨॥

તવાધરસ્પર્ધિષુ વિદ્રુમેષુ પર્યસ્તમેતત્સહસોર્મિવેગાત્ ।
ઊર્ધ્વાઙ્કુરપ્રોતમુખં કથંચિત્ક્લેશાદપક્રામતિ શઙ્ખયૂથમ્ ॥ ૧૩-૧૩॥

પ્રવૃત્તમાત્રેણ પયાંસિ પાતુમાવર્તવેગાદ્ભ્રમતા ઘનેન ।
આભાતિ ભૂયિષ્ઠમયં સમુદ્રઃ પ્રમથ્યમાનો ગિરિણેવ ભૂયઃ ॥ ૧૩-૧૪॥

દૂરાદયશ્ચક્રનિભસ્ય તન્વી તમાલતાલીવનરાજિનીલા ।
આભાતિ વેલા લવણામ્બુરાશેર્ધારાનિબદ્ધેવ કલઙ્કરેખા ॥ ૧૩-૧૫॥

વેલાનિલઃ કેતકરેણુભિસ્તે સંભાવયત્યાનનમાયતાક્ષિ ।
મામક્ષમં મણ્ડલકાલહાનેર્વેત્તીવ બિમ્બાધરબદ્ધતૃષ્ણમ્ ॥ ૧૩-૧૬॥

એતે વયં સૈકતભિન્નશુક્તિપર્યસ્તમુક્તાપટલં પયોધેઃ ।
પ્રાપ્તા મુહૂર્તેન વિમાનવેગાત્કૂલં ફલાવર્જિતપૂગમાલમ્ ॥ ૧૩-૧૭॥

કુરુષ્વ તાવત્કરભોરુ પશ્ચાન્માર્ગે મૃગપ્રેક્ષિણિ દૃષ્ટિપાતમ્ ।
એષા વિદૂરીભવતઃ સમુદ્રાત્સકાનના નિષ્પતતીવ ભૂમિઃ ॥ ૧૩-૧૮॥

ક્વચિત્પથા સંચરતે સુરાણાં ક્વચિદ્ઘનાનાં પતતાં ક્વચિચ્ચ ।
યથાવિધો મે મનસોઽભિલાષઃ પ્રવર્તતે પશ્ય તથા વિમાનમ્ ॥ ૧૩-૧૯॥

અસૌ મહેન્દ્રદ્વિપદાનગન્ધિસ્ત્રિમાર્ગગાવીચિવિમર્દશીતઃ ।
આકાશવાયુર્દિનયૌવનોત્થાનાચામતિ સ્વેદલવાન્મુખે તે ॥ ૧૩-૨૦॥

કરેણ વાતાયનલમ્બિતેન સ્પૃષ્ટસ્ત્વયા ચણ્ડિ કુતૂહલિન્યા ।
આમુઞ્ચતીવાભરણં દ્વિતીયમુદ્ભિન્નવિદ્યુદ્વલયો ઘનસ્તે ॥ ૧૩-૨૧॥

અમી જનસ્થાનમપોઢવિઘ્નં મત્વા સમારબ્ધનવોટજાનિ ।
અધ્યાસતે ચીરભૃતો યથાસ્વં ચિરોજ્ઝિતાન્યાશ્રમમણ્ડલાનિ ॥ ૧૩-૨૨॥

સૈષા સ્થલી યત્ર વિચિન્વતા ત્વાં ભ્રષ્ટં મયા નૂપુરમેકમુર્વ્યામ્ ।
અદૃશ્યત ત્વચ્ચરણારવિન્દવિશ્લેષદુઃખાદિવ બદ્ધમૌનમ્ ॥ ૧૩-૨૩॥

ત્વં રક્ષસા ભીરુ યતોઽપનીતા તં માર્ગમેતાઃ કૃપયા લતા મે ।
અદર્શયન્વક્તુમશક્નુવત્યઃ શાખાભિરાવર્જિતપલ્લવાભિઃ ॥ ૧૩-૨૪॥

મૃગ્યશ્ચ દર્ભાઙ્કુરનિર્વ્યપેક્ષાસ્તવાગતિજ્ઞં સમબોધયન્મામ્ ।
વ્યાપારયન્ત્યો દિશિ દક્ષિણસ્યામુત્પક્ષ્મરાજીનિ વિલોચનાનિ ॥ ૧૩-૨૫॥

એતદ્ગિરેર્માલ્યવતઃ પુરસ્તાદાવિર્ભવત્યમ્બરલેખિ શ‌ૃઙ્ગમ્ ।
નવં પયો યત્ર ઘનૈર્મયા ચ ત્વદ્વિપ્રયોગાશ્રુ સમં વિસૃષ્ટમ્ ॥ ૧૩-૨૬॥

ગન્ધશ્ચ ધારાહતપલ્વલાનાં કાદમ્બમર્ધોદ્ગતકેસરં ચ ।
સ્નિગ્ધાશ્ચ કેકાઃ શિખિનાં બભૂવુર્યસ્મિન્નસહ્યાનિ વિના ત્વયા મે ॥ ૧૩-૨૭॥

પૂર્વાનુભૂતં સ્મરતા ચ યત્ર કમ્પોત્તરં ભીરુ તવોપગૂઢમ્ ।
ગુહાવિસારીણ્યતિવાહિતાનિ મયા કથંચિદ્ઘનગર્જિતાનિ ॥ ૧૩-૨૮॥

આસારસિક્તક્ષિતિબાષ્પયોગાન્મામક્ષિણોદ્યત્ર વિભિન્નકોશૈઃ ।
વિડમ્બ્યમાના નવકન્દલૈસ્તે વિવાહધૂમારુણલોચનશ્રીઃ ॥ ૧૩-૨૯॥

ઉપાન્તવાનીરવનોપગૂઢાન્યાલક્ષ્યપારિપ્લવસારસાનિ ।
દૂરાવતીર્ણા પિબતીવ ખેદાદમૂનિ પમ્પાસલિલાનિ દૃષ્ટિઃ ॥ ૧૩-૩૦॥

અત્રાવિયુક્તાનિ રથઙ્ગનામ્નામન્યોન્યદત્તોત્પલકેસરાણિ ।
દ્વન્દ્વાનિ દૂરાન્તરવર્તિના તે મયા પ્રિયે સસ્મિતમીક્ષિતાનિ ॥ ૧૩-૩૧॥

ઇમાં તટાશોકલતાં ચ તન્વીં સ્તનાભિરામસ્તબકાભિનમ્રામ્ ।
ત્વત્પ્રાપ્તિબુદ્ધ્યા પરિરબ્ધુકામઃ સૌમિત્રિણા સાશ્રુરહં નિષિદ્ધઃ ॥ ૧૩-૩૨॥

અમૂર્વિમાનાન્તરલમ્બિનીનાં શ્રુત્વા સ્વનં કાઞ્ચનકિઙ્કિણીનામ્ ।
પ્રત્યુદ્વ્રજન્તીવ ખમુત્પતન્ત્યો ગોદાવરીસારસપઙ્ક્તયસ્ત્વામ્ ॥ ૧૩-૩૩॥

એષા ત્વયા પેશલમધ્યયાપિ ઘટામ્બુસંવર્ધિતબાલચૂતા ।
આનન્દયત્યુન્મુખકૃષ્ણસારા દૃષ્ટા ચિરાત્પઞ્ચવટી મનો મે ॥ ૧૩-૩૪॥

અત્રાનુગોદં મૃગયાનિવૃત્તસ્તરંગવાતેન વિનીતખેદઃ ।
રહસ્ત્વદુત્સઙ્ગનિષણ્ણમૂર્ધા સ્મરામિ વાનીરગૃહેષુ સુપ્તઃ ॥ ૧૩-૩૫॥

ભ્રૂભેદમાત્રેણ પદાન્મઘોનઃ પ્રભ્રંશયાં યો નહુષં ચકાર ।
તસ્યાવિલામ્ભઃપરિશુદ્ધિહેતોર્ભૌમો મુનેઃ સ્થાનપરિગ્રહોઽયમ્ ॥ ૧૩-૩૬॥

ત્રેતાગ્નિધૂમાગ્રમનિન્દ્યકીર્તેસ્તસ્યેદમાક્રાન્તવિમાનમાર્ગમ્ ।
ઘ્રાત્વા હવિર્ગન્ધિ રજોવિમુક્તઃ સમશ્નુતે મે લઘિમાનમાત્મા ॥ ૧૩-૩૭॥

એતન્મુનેર્માનિનિ શાતકર્ણેઃ પઞ્ચાપ્સરો નામ વિહારવારિ ।
આભાતિ પર્યન્તવનં વિદૂરાન્મેઘાન્તરાલક્ષ્યમિવેન્દુબિમ્બમ્ ॥ ૧૩-૩૮॥

પુરા સ દર્ભાઙ્કુરમાત્રવૃત્તિશ્ચરન્મૃગૈઃ સાર્ધમૃષિર્મઘોના ।

સમાધિભીતેન કિલોપનીતઃ પઞ્ચાપ્સરોયૌવનકૂટબન્ધમ્ ॥ ૧૩-૩૯॥

તસ્યાયમન્તર્હિતસૌધભાજઃ પ્રસક્તસંગીતમૃદઙ્ગઘોષઃ ।
વિયદ્ગતઃ પુષ્પકચન્દ્રશાલાઃ ક્ષણં પ્રતિશ્રુન્મુખરાઃ કરોતિ ॥ ૧૩-૪૦॥

હવિર્ભુજામેધવતાં ચતુર્ણાં મધ્યે લલાટંતપસપ્તસપ્તિઃ ।
અસૌ તપસ્યત્યપરસ્તપસ્વી નામ્ના સુતીક્ષ્ણશ્ચરિતેન દાન્તઃ ॥ ૧૩-૪૧॥

અમું સહાસપ્રહિતેક્ષણાનિ વ્યાજાર્ધસંદર્શિતમેખલાનિ ।
નાલં વિકર્તું જનિતેન્દ્રશઙ્કં સુરાઙ્ગનાવિભ્રમચેષ્ટિતાનિ ॥ ૧૩-૪૨॥

એષોઽક્ષમાલાવલયં મૃગાણાં કણ્ડૂયિતારં કુશસૂચિલાવમ્ ।
સભાજને મે ભુજમૂર્ધ્વબાહુઃ સવ્યેતરં પ્રાધ્વમિતઃ પ્રયુઙ્ક્તે ॥ ૧૩-૪૩॥

વાચંયમત્વાત્પ્રણતિં મમૈષ કમ્પેન કિઞ્ચિત્પ્રતિગૃહ્ય મૂર્ધ્નઃ ।
દૃષ્ટિં વિમાનવ્યવધાનમુક્તાં પુનઃ સહસ્રાર્ચિષિ સંનિધત્તે ॥ ૧૩-૪૪॥

અદઃ શરણ્યં શરભઙ્ગનામ્નસ્તપોવનં પાવનમાહિતાગ્નેઃ ।
ચિરાય સંતર્પ્ય સમિદ્ભિરગ્નિં યો મન્ત્રપૂતાં તનુમપ્યહૌષીત્ ॥ ૧૩-૪૫॥

છાયાવિનીતાધ્વપરિશ્રમેષુ ભૂયિષ્ઠસંભાવ્યફલેષ્વમીષુ ।
તસ્યાતિથીનામધુનાસપર્યા સ્થિતા સુપુત્રેષ્વિવ પાદપેષુ ॥ ૧૩-૪૬॥

ધારાસ્વનોદ્ગારિદરીમુખોઽસૌ શૃઙ્ગાઙ્ગલગ્નામ્બુજવપ્રપઙ્કઃ ।
બધ્નાતિ મે બન્ધુરગાત્રિ ચક્ષુર્દૃપ્તઃ કકુદ્માનિવ ચિત્રકૂટઃ ॥ ૧૩-૪૭॥

એષા પ્રસન્નસ્તિમિતપ્રવાહા સરિદ્વિદૂરાન્તરભાવતન્વી ।
મન્દાકિની ભાતિ નગોપકણ્ઠે મુક્તાવલી કણ્ઠગતેવ ભૂમેઃ ॥ ૧૩-૪૮॥

અયં સુજાતોઽનુગિરં તમાલઃ પ્રવાલમાદાય સુગન્ધિ યસ્ય ।
યવાઙ્કુરાપાણ્ડુકપોલશોભી મયાવતંસઃ પરિકલ્પિતસ્તે ॥ ૧૩-૪૯॥

અનિગ્રહત્રાસવિનીતસત્ત્વમપુષ્પલિઙ્ગાત્ફલબન્ધિવૃક્ષમ્ ।
વનં તપઃસાધનમેતદત્રેરાવિષ્કૃતોદગ્રતરપ્રભાવમ્ ॥ ૧૩-૫૦॥

અત્રાભિષેકાય તપોધનાનાં સપ્તર્ષિહસ્તોદ્ધૃતહેમપદ્મામ્ ।
પ્રવર્તયામાસ કિલાનસૂયા ત્રિસ્રોતસં ત્ર્યમ્બકમૌલિમાલામ્ ॥ ૧૩-૫૧॥

વીરાસનૈર્ધ્યાનજુષામૃષીણામમી સમધ્યાસિતવેદિમધ્યાઃ ।
નિવાતનિષ્કમ્પતયા વિભાન્તિ યોગાધિરૂઢા ઇવ શાખિનોઽપિ ॥ ૧૩-૫૨॥

ત્વયા પુરસ્તાદુપયાચિતો યઃ સોઽયં વટઃ શ્યામ ઇતિ પ્રતીતઃ ।
રાશિર્મણીનામિવ ગારુડાનાં સપદ્મરાગઃ ફલિતો વિભાતિ ॥ ૧૩-૫૩॥

ક્વચિત્પ્રભાલેપિભિરિન્દ્રનીલૈર્મુક્તામયી યષ્ટિરિવાનુવિદ્ધા ।
અન્યત્ર માલા સિતપઙ્કજાનામિન્દીવરૈરુત્ખચિતાન્તરેવ ॥ ૧૩-૫૪॥

ક્વચિત્ખગાનાં પ્રિયમાનસાનાં કાદમ્બસંસર્ગવતીવ પઙ્ક્તિઃ ।
અન્યત્ર કાલાગુરુદત્તપત્રા ભક્તિર્ભુવશ્ચન્દનકલ્પિતેવ ॥ ૧૩-૫૫॥

ક્વચિત્પ્રભા ચાન્દ્રમસી તમોભિશ્છાયાવિલીનૈઃ શબલીકૃતેવ ।
અન્યત્ર શુભ્રા શરદભ્રલેખા રન્ધ્રેષ્વિવાલક્ષ્યનભઃપ્રદેશા ॥ ૧૩-૫૬॥

ક્વચિચ્ચ કૃષ્ણોરગભૂષણેવ ભસ્માઙ્ગરાગા તનુરીશ્વરસ્ય ।
પશ્યાનવદ્યાઙ્ગિ વિભાતિ ગઙ્ગા ભિન્નપ્રવાહા યમુનાતરઙ્ગૈઃ ॥ ૧૩-૫૭॥

સમુદ્રપત્ન્યોર્જલસંનિપાતે પૂતાત્મનામત્ર કિલાભિષેકાત્ ।
તત્ત્વાવબોધેન વિનાપિ ભૂયસ્તનુત્યજાં નાસ્તિ શરીરબન્ધઃ ॥ ૧૩-૫૮॥

પુરં નિષાદાધિપતેરિદં તદ્યસ્મિન્મયા મૌલિમણિં વિહાય ।
જટાસુ બદ્ધાસ્વરુદત્સુમન્ત્રઃ કૈકેયિ કામાઃ ફલિતાસ્તવેતિ ॥ ૧૩-૫૯॥

પયોધરૈઃ પુણ્યજનાઙ્ગનાનાં નિર્વિષ્ટહેમામ્બુજરેણુ યસ્યાઃ ।
બ્રાહ્મં સરઃ કારણમાપ્તવાચો બુદ્ધેરિવાવ્યક્તમુદાહરન્તિ ॥ ૧૩-૬૦॥

જલાનિ યા તીરનિખાતયૂપા વહત્યયોધ્યામનુ રાજધાનીમ્ ।
તુરંગમેધાવભૃથાવતીર્ણૈરિક્ષ્વાકુભિઃ પુણ્યતરીકૃતાનિ ॥ ૧૩-૬૧॥

યાં સૈકતોત્સઙ્ગસુખોચિતાનાં પ્રાજ્યૈઃ પયોભિઃ પરિવર્ધિતાનામ્ ।
સામાન્યધાત્રીમિવ માનસં મે સંભાવયત્યુત્તરકોસલાનામ્ ॥ ૧૩-૬૨॥

સેયં મદીયા જનનીવ તેન માન્યેન રાજ્ઞા સરયૂર્વિયુક્તા ।
દૂરે વસન્તં શિશિરાનિલૈર્માં તરંગહસ્તૈરુપગૂહતીવ ॥ ૧૩-૬૩॥

વિરક્તસંધ્યાકપિશં પરસ્તાદ્યતો રજઃ પાર્થિવમુજ્જિહીતે ।
શઙ્કે હનૂમત્કથિતપ્રવૃત્તિઃ પ્રત્યુદ્ગતો માં ભરતઃ સસૈન્યઃ ॥ ૧૩-૬૪॥

અદ્ધા શ્રિયં પાલિતસંગરાય પ્રત્યર્પયિષ્યત્યનઘાં સ સાધુઃ ।
હત્વા નિવૃત્તાય મૃધે ખરાદીન્સંરક્ષિતાં ત્વામિવ લક્ષ્મણો મે ॥ ૧૩-૬૫॥

અસૌ પુરસ્કૃત્ય ગુરું પદાતિઃ પશ્ચાદવસ્થાપિતવાહિનીકઃ ।
વૃદ્ધૈરમાત્યૈઃ સહ ચીરવાસા મામર્ઘ્યપાણિર્ભરતોઽભ્યુપૈતિ ॥ ૧૩-૬૬॥

પિત્રા વિસૃષ્ટાં મદપેક્ષયા યઃ શ્રિયં યુવાપ્યઙ્કગતામભોક્તા ।
ઇયન્તિ વર્ષાણિ તયા સહોગ્રમભ્યસ્યતીવ વ્રતમાસિધારમ્ ॥ ૧૩-૬૭॥

એતાવદુક્તવતિ દાશરથૌ તદીયા-
મિચ્છાં વિમાનમધિદેવતયા વિદિત્વા ।
જ્યોતિષ્પથાદવતાર સવિસ્મયાભિ-
રુદ્વીક્ષિતં પ્રકૃતિભિર્ભરતાનુગાભિઃ ॥ ૧૩-૬૮॥

તસ્માત્પુરઃસરબિભીષણદર્શનેન
સેવાવિચક્ષણહરીશ્વરદત્તહસ્તઃ ।
યાનાદવાતરદદૂરમહીતલેન
માર્ગેણ ભઙ્ગિરચિતસ્ફટિકેન રામઃ ॥ ૧૩-૬૯॥

ઇક્ષ્વાકુવંશગુરવે પ્રયતઃ પ્રણમ્ય
સ ભ્રાતરં ભરતમર્ઘ્યપરિગ્રહાન્તે ।
પર્યશ્રુરસ્વજત મૂર્ધનિ ચોપજઘ્રૌ
તદ્ભક્ત્યપોઢપિતૃરાજ્યમહાભિષેકે ॥ ૧૩-૭૦॥

શ્મશ્રુપ્રવૃદ્ધિજનિતાનનવિક્રિયાંશ્ચ
પ્લક્ષાન્પ્રરોહજટિલાનિવ મન્ત્રિવૃદ્ધાન્ ।
અન્વગ્રહીત્પ્રણવતઃ શુભદૃષ્ટિપાતૈ-
ર્વાતાનુયોગમધુરાક્ષરયા ચ વાચા ॥ ૧૩-૭૧॥

દુર્જાતબન્ધુરયમૃક્ષહરીશ્વરો મે
પૌલસ્ત્ય એષ સમરેષુ પુરઃપ્રહર્તા ।
ઇત્યાદૃતેન કથિતૌ રઘુનન્દનેન
વ્યુત્ક્રમ્ય લક્ષ્મણમુભૌ ભરતો વવન્દે ॥ ૧૩-૭૨॥

સૌમિત્રિણા તદનુ સંસસૃજે સ ચૈન-
મુત્થાપ્ય નમ્રશિરસં ભૃશમાલિલિઙ્ગ ।
રૂઢેન્દ્રજિત્પ્રહરણવ્રણકર્કશેન
ક્લિશ્યન્નિવાસ્ય ભુજમધ્યમુરસ્થલેન ॥ ૧૩-૭૩॥

રામાજ્ઞયા હરિચમૂપતયસ્તદાનીં
કૃત્વા મનુષ્યવપુરારુરુહુર્ગજેન્દ્રાન્ ।
તેષુ ક્ષરત્સુ બહુધા મદવારિધારાઃ

શૈલાધિરોહણસુખાન્યુપલેભિરેમે ॥ ૧૩-૭૪॥

સાનુપ્લવઃ પ્રભુરપિ ક્ષણદાચરાણાં
ભેજે રથાન્દશરથપ્રભવાનુશિષ્ટઃ ।
માયાવિકલ્પરચિતૈરપિ યે તદીયૈ-
ર્ન સ્યન્દનૈસ્તુલિતકૃત્રિમભક્તિશોભાઃ ॥ ૧૩-૭૫॥

ભૂયસ્તતો રઘુપતિર્વિલસત્પતાક-
મધ્યાસ્ત કામગતિ સાવરજો વિમાનમ્ ।
દોષાતનં બુધબૃહસ્પતિયોગદૃશ્ય-
સ્તારાપતિસ્તરલવિદ્યુદિવાભ્રવૃન્દમ્ ॥ ૧૩-૭૬॥

તત્રેશ્વરેણ જગતાં પ્રલયાદિવોર્વીં
વર્ષાત્યયેન રુચમભ્રઘનાદિવેન્દોઃ।
રામેણ મૈથિલસુતાં દશકણ્ઠકૃચ્છ્રા-
ત્પ્રત્યુદ્ધૃતાં ધૃતિમતીં ભરતો વવન્દે ॥ ૧૩-૭૭॥

લઙ્કેશ્વરપ્રણતિભઙ્ગદૃઢવ્રતં ત-
દ્વન્દ્યં યુગં ચરણયોર્જનકાત્મજાયાઃ ।
જ્યેષ્ઠાનુવૃત્તિજટિલં ચ શિરોઽસ્ય સાધો-
રન્યોન્યપાવનમભૂદુભયં સમેત્ય ॥ ૧૩-૭૮॥

ક્રોશાર્ધં પ્રકૃતિપુરઃસરેણ ગત્વા
કાકુત્સ્થઃ સ્તિમિતજવેન પુષ્પકેણ ।
શત્રુઘ્નપ્રતિવિહિતોપકાર્યમાર્યઃ
સાકેતોપવનમુદારમધ્યુવાસ ॥ ૧૩-૭૯॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસકૃતૌ
દણ્ડકાપ્રત્યાગમનો નામ ત્રયોદશઃ સર્ગઃ ॥

Encoded and Proofread by
Arvind Kolhatkar akolhatkar at rogers.com

*Raghuvansha 13 by Kalidas*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*